ISSN : 2394-1022

# संस्कृतिशोधसन्देशः

A Quarterly Trilingual Peer Reviewed National Referred Journal

समकक्षव्यक्तिसमीक्षितत्रैभाषिकराष्ट्रियशोधपत्रिका

वर्षम् : 14 | अंकः 52 | फरवरी 2025 - अप्रैल 2025 | पृष्ठानि : 100



प्रकाशकः :

श्रीमती–मोहरीदेवीतापड़ियाशोधसंस्थानम्

जसवन्तगढम्–341304 ( नागौरम्, राजस्थानम् )

# अनुक्रमणिका


| | | | |
|---|---|---|---|
| 1. | ज्योतिषशास्त्रास्य विवेचना | – डॉ. हेमन्तकृष्णमिश्रः | 4–9 |
| 2. | भक्ति की शास्त्रीय परम्परा | – डॉ. महेश शर्मा | 10–33 |
| 3. | भारतीयज्ञानगरिमा | – डॉ. उमामहेश्वरी बी. | 34–38 |
| 4. | श्रीमधुसूदनौझालोके पुराणोद्गमः | – कृष्णदेवशुक्लः | 39–42 |
| 5. | धात्वर्थसमीक्षा | – डॉ. कार्तिकभाग्वत् | 43–50 |
| 6. | प्राचीन भारतीय गणित शास्त्र की वैदिकी परम्परा | – डॉ. नीरज त्रिवेदी | 51–55 |
| 7. | रामचरितमानस में राष्ट्रनायक राम | – डॉ. कल्पना दीक्षित | 56–66 |
| 8. | वेदादि शास्त्रो में भारतीय ज्ञान परम्परा | – डॉ. रामकुमारी | 67–74 |
| 9. | विद्यालयेभ्यः अध्ययनविरततायाः कारणानि तन्निवारणोपायश्च | – रामेश्वरचौधरी | 75–78 |
| 10. | जिनदत्तचरित्रास्य वैशिष्टयम् | – बलबीर शर्मा | 79–81 |
| 11. | नवांश कुंडली का जीवन में महत्त्व | – कीर्ति शर्मा | 82–84 |
| 12. | भारतीयज्ञानपरम्परायां शैक्षिकचिन्तनम् | – रामकुमारजाटः | 85–87 |
| 13. | **A Psychological Study of Mulkraj Anand's Untouchable** | – **Chandra Shekhar Mishra** | 88–93 |
| 14. | वेदेष्वथर्ववेदस्य वैशिष्ट्यम् | – श्रीशिवानन्द दुबे | 94–97 |
| 15. | महाभारतस्य वैशिष्ट्यम् | – अनु कुमारी | 98–100 |


पाठकेभ्यः प्रार्थनम् – अयि भो मान्याः विद्वांस ! इयं शोध-पत्रिका मासत्रये प्रकाशयिष्यते । अस्यै पत्रिकायै भवन्तः शोधलेखान्, वैचारिकलेखान्, कथाः विनोदवार्ताः, संस्कृतस्य विशिष्टसूचनाः अन्यप्रकाशनार्हसामग्रीः च सम्प्रेष्य अनुगृह्णन्तु – दूरभाषः – मो : 9461926348 | ईमेलः – sanskritishodhsandesh@gmail.com | smdt.jwg2008@gmail.com

# भारतीयज्ञानगरिमा

– डॉ. उमामहेश्वरी बी.

व्याकरणे प्रवर्तमानानां दर्शनस्वरूपं तेषां प्रचलनस्य आरम्भसीमा न प्राप्यते, परन्तु एतस्याः परिपाटेः प्रचलनं शास्त्रे दरीदृश्यते। तेषु व्यक्तिविवेकादयः ग्रन्थाः प्रसिद्धाः सन्ति। यथा–

**प्रस्तावना** – चतुरशीतिलक्षकजीवराशिषु अद्वितीयः असमानः नित्यानित्यविवेकवान् धर्माधर्मविचक्षणः, स्वसुखदुःखाद्यनुभवान् वाग्वैखर्या अभिव्यक्तीकरणसमर्थः, जीवनस्य ऐथम्प्राथम्येन अपरविद्याभिः स्तूयमानमुख्यलक्ष्यस्य परमपदस्य प्राप्तियोग्यः धीरश्च वर्तते मनुष्यः। तस्य योग्यत्वविषये नास्ति त्रिषु लोकेषु कस्यचित्संशयः। यतो हि मानवः दृढसङ्कल्पो भूत्वा यदि चिन्तयति तर्हि षड् शतमपि कर्तुं शक्नोति शतं षडपि परिवर्तितुमर्हति। अतः सर्वशक्तियुक्तिसम्पन्नपुरुषस्य अज्ञाननिवारणेन सह ज्ञानगरिमा भारतीयदर्शनेषु सनातनपरम्परायाञ्च कथं वर्तत इति विचारयामः।

कुञ्चिका शब्दाः – तत्त्वज्ञानम्, अतत्त्वज्ञानम्, सत्कर्म, असत्कर्म, पुण्यकर्म, पापकर्मेत्यादयः।

**शोधप्रबन्ध** – अल्पज्ञः अज्ञानयुक्तः इति कथ्यमानजीवस्य सर्वशक्तियुक्तिसम्पन्नसामर्थ्यं कथमिति उत्पद्यते जिज्ञासा। तर्हि उच्यते –

**ब्रह्मणः सर्वभूतानि जायन्ते परमात्मनः।**
**तस्मादेतानि ब्रह्मैव भवन्तीत्यवधारयेत्॥**
**अग्निर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव।**
**एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च॥**

सच्चिदानन्दस्वरूपभूतपरमात्मनः प्रतिबिम्बत्वात्। भगवता परमेश्वरेण सृष्टमिदं जगत् भोक्तुम् अनुभवितुं च सम्पूर्णरूपेण अर्हः योग्यः समर्थश्च जीवः, प्रकृत्या प्रदत्तद्रव्याणि स्वबुद्धया शक्त्या युक्त्या च स्वजीवनाय योग्यरूपेण परिवर्त्य, स्वानुकूल्यं सुखं, कदाचित् दुःखमपि अनुभवति।

सत्कर्मभिः सच्चिन्तनैश्च सञ्चरन् कश्चनजीवः सर्वभूतानि स्वस्मिन्नालोकयन् सर्वभूतेषु च स्वात्मानमवलोकयन् सच्चिदानन्दपरमात्मानं सर्वत्र विलोक्य अमितानन्देन विराजते। असत्कर्मभिः सञ्चरन् अन्यः कश्चनजीवः परमात्मानमजानन् 'कण्ठचामीकरन्यायेन' स्वात्मस्थप्रभोः मयि दया नास्तीति चिन्तयन् दुःखमनुभवति।

वास्तविकदृष्ट्या सदसत्कर्मणां ज्ञानाय शास्त्राणि सर्वदाऽस्मान् पितृवत् हस्तं गृहीत्वा दर्शयन्ति चालयन्ति च। सदसत्कर्मविवेकाय तयोः सम्पूर्णविचक्षणाय च मानवस्य जिज्ञासा, निरन्तराभ्यासः, तदर्थं उत्साहश्च आबाल्यादेव जीवस्य बुद्धौ जागृयात्। अस्माकं संस्कृतिरेव तादृशी वर्तते यत् गर्भस्थशिशुत एव विद्याभ्यासस्य सुसंस्काराणाञ्च बीजान्यारोप्य तं जीवं जिज्ञापयिष्यति। ततः गर्भात् बहिर्निर्गत्य अभ्यस्थविद्यामग्रे विस्तारयति। शिशुः यादृशसंस्कारैः बाल्यं जीवति तैः संस्कारैः प्रेरितः सदसत्कर्मसु प्रवर्तते। यदि सः बालः रामायण–महाभारत–भागवतादिसच्छास्त्रश्रवणैः सत्सेवाभिः सुभाषितैश्च सुसंस्कृतः तर्हि सर्वत्र तत्संस्कारफलानि द्रक्ष्यन् स्वजीवनं स्वराज्यं स्वदेशञ्च सुखमयं कर्तुं प्रभवति। यदि अश्रुतः असंस्कृतः तर्हि दुःखे दुःखादिकान् पश्यन् सुखे सुखादिकान् च पश्यन् आत्मानं शोकहर्षाभ्यां प्रदाय महद्दुःखमनुभवति, सर्वानपि दुःखभाजान् करोति।

अज्ञानप्रभवं सर्वं ज्ञानेन प्रविलीयते। अर्थात् अज्ञानेनोत्पन्नं सर्वं दुःखं ज्ञानेन विनष्टो भवति। अतः आबाल्यादेव मनुष्यस्य बुद्धिः तर्कसहितपदार्थयथार्थज्ञानेन संवलिता स्यात्, तर्हि सः निश्चयेन परमात्मना सङ्कल्प्य सृष्टसृष्टेः यथार्थज्ञानं ज्ञात्वा तत्सङ्कल्पं स्वजीवने साकारं कृत्वा परानपि साकारार्थं प्रेरयन् जगति अपरब्रह्मवत् विराजते। मानवजीवने ज्ञानं महद्वैशिष्ट्यम् आवहति। यतो हि–

**आहारनिद्राभयमैथुनानि सामान्यमेतत्पशुभिर्नराणाम्।**
**ज्ञानं हि तेषामधिको विशेषो ज्ञानेन हीनाः पशुभिस्समानाः।।**

इति चाणक्यनीतौ, 'न हि ज्ञानेन सदृशं पवित्रमिह विद्यते' इति साक्षाद्धरिस्वरूपस्य भगवान् श्रीकृष्णस्य ज्ञानसदृशं पवित्रम्, उत्कृष्टमस्मिन् लोके नास्त्येवेति उक्तिरपि ज्ञानस्य वैशिष्ट्यं प्रतिपादयति। भवतु नाम ज्ञानस्य वैशिष्ट्यं महद्वर्तते किन्तु तज्ज्ञानं कः प्राप्नुयादिति चेत्, तत्रैवोक्तं 'श्रद्धावान्' इति। अर्थात् यः पुरुषः श्रद्धावान् भवति सः ज्ञानं लब्धुं शक्नोति, यो हि निरन्तरं श्रद्धायुक्तः तस्यैव ज्ञानं सम्पद्यते इत्यादीनि प्रमाणानि बहून्यस्माभिः लभ्यन्ते। ज्ञानवता पुरुषेण कृतानि सर्वाण्यपि कर्माणि ज्ञानवशात् भस्मीभूतानि भवन्ति, 'ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा'। यदा तस्य सर्वाण्यपि कर्माणि भस्मीपटलानि जातानि तदा सः ज्ञानी पुरुषः साक्षात् भगवत्स्वरूपमेवेति 'ध्यात्वा मुनिर्गच्छति भूतयोनिं समस्तसाक्षिं तमसः परस्तात्' 'ज्ञानीत्वात्मैव मे मतम्' नान्यत् किञ्चन कर्तव्य–भोक्तव्यकर्म तस्य विद्यते, तेन जीवनस्य यत्परमं लक्ष्यं तं प्राप्य परमानन्देन विराजते।

सुसंस्कारैः संस्कृतः विवेकी पुरुषः, कालानुगुणेन अधोनीयमानसंस्कारान् सम्प्रदायान् संस्कृतीञ्च उद्धर्तुं पुनः स्थापयितुं शक्नुयात्। सङ्क्षीयमानमानवमूल्यान् भूतदयां निःस्वार्थादि–स्वभावान् पुनरुद्धरणाय मानवं वेदाः शास्त्राणि गुरवश्च बहुधा उपकुर्वन्ति।

**विना गुरुभ्यो गुणनीरदिभ्यो जानाति तत्त्वं न विचक्षणोऽपि।**
**आकर्णदीर्घायुतलोचनोऽपि दीपं विना पश्यति नान्धकारे।।**

अयं निजः परोवेति गणनां निर्मूल्य परगुणपरमाणूनपि पर्वतीकृत्य प्रदर्शयन् निजहृत्सु विहारयन्ति, अघटितघटितं घटयितुं सुघटितघटितानि दुर्घटीकर्तुमपि सामर्थ्यं प्रदास्यन्ति।

**मा भैष्ट विद्वंस्तव नास्त्यपायः, संसारसिन्धोस्तरणेऽस्त्युपायः।**
**येनैव याता यतयोऽस्य पारं तमेव मार्गं तव निर्दिशामि।।**
**इति मनसि धैर्यं स्थैर्यं च पूरयन्ति।**

शरीरेन्द्रियमनस्सु अन्यतरमेव आत्म न कश्चित् भिन्नमस्तीत्युच्यमानावैदिकज्ञानात् तेभ्यः सर्वेभ्यः भिन्नः, चेतनप्रदाता, नित्यसुखस्वरूपवान् जीवात्मेति विविधोपमानैः अनुभवैश्च साक्षात्कारं कारयन् तत्त्वज्ञानं दर्शयन्ति।

वस्तुतः अज्ञानकाले अनुभूयमान–अतत्त्वम् तत्त्वज्ञानञ्च सम्यग्विज्ञाय मनुष्यः उपर्युक्तसहकारिभिः लक्ष्यं सुलभतया प्राप्नोति 'नोत्पद्यते विना ज्ञानं विचारेणान्यसाधनैः। अतत्त्व–तत्त्वज्ञानयोः स्वरूपं किम् इति चेत् न्यायभाष्ये योगभाष्यादिषु स्पष्टीकृतं यथा–

**अतत्त्वज्ञानम्** – विद्यमाने आत्मनि नास्तीति, अनात्मनि आत्मेति, दुःखे सुखमिति, अनित्ये नित्यमिति, अत्राणे त्राणमिति, सभये निर्भयमिति, जुगुप्सिते अभिमतमिति, हातव्ये अप्रतिहातव्यमिति, प्रवृत्तौ नास्ति कर्म नास्ति कर्मफलमिति, दोषेषु नायं दोषनिमित्तः संसार इत्यादि मिथ्याज्ञानम् , मिथ्या ज्ञानात् दोषाः प्रभवन्ति, दोषेभ्यः प्रवृत्तिः, प्रवृत्तेरधर्मः, अधर्मफलस्य पापस्य भोगार्थं जन्म, ततो दुःखम्। एतैः अविच्छेदेन प्रवर्तमानः संसारः।

**काचभूमौ जलत्वं च जलभूमौ हि काचता।**
**तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः।।**

**तत्त्वज्ञानञ्च** – विद्यमाने आत्मनि अस्तीति, अनात्मनि अनात्मेति, दुःखे दुःखमिति, अनित्ये अनित्यमिति, अत्राणे अत्राणमिति, सभये भयसहितमिति, जुगुप्सिते जुगुप्सितमिति, हातव्ये हातव्यमिति, प्रवृत्तौ अस्ति कर्म अस्ति कर्मफलमिति, दोषेषु दोषनिमित्तोऽयं संसार इत्यादि ज्ञानम् । यदा तत्त्वज्ञानात् मिथ्याज्ञानमपैति तदा मिथ्याज्ञानस्याभावे दोषज्ञानमपगच्छति, दोषाभावे प्रवृत्तिरपि न भवति, यदा प्रवृत्तिर्नास्ति जीवे तदा जन्मापि नास्ति, जन्मनः अपाये दुःखमपि अपगच्छति ततः आत्यन्तिकमपवर्गश्च लभ्यते । साङ्ख्यदर्शने तत्त्वज्ञानोत्पत्तिक्रमः ––

**"एवं तत्त्वाभ्यासान्नास्मि न मे नाहमित्यपरिशेषम्।**
**अविपर्ययाद्विशुद्धं केवलमुत्पद्यते ज्ञानम्।।**

पञ्चविंशतितत्त्वानामभ्यासात् तत्त्वदर्शनम्। तत्त्वदर्शनात्परं 'यत् नास्मि तत्त्वानि, न मे तत्त्वानि, नाहं तत्त्वानां किन्तु प्रधानिकान्येतानि। न मे शरीरं यतोऽहमन्यः शरीरमन्यत् नाहम् इत्यपरिशेषम् अहङ्काररहितम्। संशयरहितत्वाद्यथाभूतार्थदर्शनाद्विशुद्धमेवं पुरुषस्य ज्ञानमुत्पद्यते।

'वेदैरनेकैरहमेव वेद्यो वेदान्तकृद्वेदविदेव चाहम्। न पुण्यपापे मम नास्ति नाशो न जन्म देहेन्द्रियबुद्धिरस्ति। न भूमिरापो न च वह्निरस्ति न चानिलो मेऽस्ति न चाम्बरञ्च। एवं विदित्वा

**परमात्मरूपं गुहाशयं निष्कलमद्वितीयम्।**
**प्रयाति शुद्धं परमात्मरूपं।।**

विवेकज्ञानमिदं मानवं नित्याऽनित्य, पुण्यापुण्य, सुख–दुःख, लाभालाभ, जयाऽजय, इहपरेभ्यः सर्वेभ्यश्च द्वन्द्वेभ्यः विभिन्नतया निर्लिप्ततया प्रत्येकतया च परिचाययति। 'यस्मिन् सर्वाणि भूतानि ह्यात्मत्वेन विजानतः। न वै तस्य भवेन्मोहो न च शोकोऽद्वितीयतः।।' विवेकपुरुषस्य स्वस्मादि्भन्नं वस्तु न परिदृश्यते। सर्वभूतस्थमात्मानमथ च सर्वभूतानि आत्मनि पश्यन् मानवजन्मनः परममुद्देश्यं परुषार्थचतुष्टये परमपुरुषार्थं प्राप्तुं, परमात्मनः क्रीडां सफलीकर्तुञ्च विज्ञानीपुरुषः एक एव समर्थः। अतः शास्त्रेषु प्रतिपादितगूढतत्त्वम् आत्यन्तिकदुःखनिवृत्तिपुरस्सरपरमानन्दप्राप्तिपन्थां च सम्पाद्य परमात्मना सह स्वात्मानं संयोज्य आनन्दमनुभवितुमर्हति। 'स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः' इति भगवद्वचनानुसारं स्वस्वकर्मसु निष्कामबुद्ध्या कर्तव्यताकबुद्ध्या च प्रवर्तमानाः पुरुषाः सम्यक्सिद्धिं लभन्ते एव।

**उपसंहारः –**

**रत्नाकरधौतपादां हिमालयकिरीटिनीम्।**
**ब्रह्मराजर्षिरत्नाढ्यां वन्दे भारतमातरम्।।**

दुर्लभं भारते जन्म, ततोदुर्लभं मानुषजन्म, तत्रापि विवेकज्ञानाध्ययनम् अभ्यासश्च। ततोऽपि तेषामात्मसात्करणम्। गतानुगतिको लोकः इति न्यायं परिवर्त्य विवेकज्ञानेन महाजनो येन गतस्सपन्थाः इति न्यायमनुसरामः। वैशिष्ट्यभूयिष्ट्स्य मानवजन्म सार्थकं कुर्मः। भगवत्प्रदत्तजन्मेदं व्यर्थं न गच्छेदेतदर्थं प्रयतामहे।

**तच्चिन्तनं तत्कथनमन्योन्यं तत्प्रबोधनम्।**
**एतदेकपरत्वं च ब्रह्माभ्यासं विदुर्बुधाः।।**

तच्चिन्तनं नाम हृदये प्रतिक्षणं परब्रह्मणः चिन्तनम्, तदुपपादकोपनिषद्वाक्यानां गुरूपदिष्टवेदान्तवाक्यानां च साहाय्येन पौनःपुण्येन मनसि चिन्तनम्, दृश्यमानजगतः अभिन्नभूतस्य परमात्मनः स्वरूपस्य कथनं सम्बोधनम्, अधीतविषयं तर्कसहितं युक्तियुक्तं सशास्त्रप्रामाण्यं च

गुरुजनैः अन्योन्यं संवादपूर्वकं तत्प्रबोधनम्, तस्यैव मुख्यत्वेन आसक्तिः तदेकपरत्वम् एतदेव ब्रह्माभ्यास इति बुधाः सज्जनाः विदुः। एवञ्च

**"कञ्चित्कालमुमामहेश भवतः पादारविन्दार्चनैः**
**कञ्चिद्ध्यानसमाधिभिश्च नुतिभिः कञ्चित्कथा कर्णनैः।**

**कञ्चित्कञ्चिदवेक्षणैश्च नतिभिः कञ्चिद्दशामीदृशीं**
**यः प्राप्नोति मुदा त्वदर्पितमन जीवन् समुक्तः खलु"।।**

**सन्दर्भग्रन्थसूची :**


1. विवेकचूडामणिः, श्री आदिशङ्कराचार्यः, व्याख्याकारः – पण्डित मनोहरलाल शर्मा (डॉ.). महान्त जी, ओंकार मठ, दण्डीवाडा, गढमुक्तेश्वर्व, मेरठ।
2. अपरोक्षानुभूतिः – श्रीमच्छङ्कराचार्यविरचितं प्रकरणपञ्चकम्, भाषानुवादसहितम्, प्रकाशकः– श्रेष्ठप्रवरः श्रीगौरीशङ्करगोयन्काः, अच्युतग्रन्थमालाकार्यालयः, काशी
3. न्यायभाष्यम् – महर्षिगौतमकृतन्यायसूत्राणां श्रीवात्स्यायनमुनिप्रणीतम्, सम्पादकः – स्वामी द्वारिकादासशास्त्री, सुधी प्रकाशनम्, वाराणसी– १६८३।
4. श्रीमद्भगवद्गीता, गीताप्रेस्, गोरखपुरम्।
5. मन्त्रपुष्पम्, कैवल्योपनिषद्, पृ–३१३ रामकृष्ण मठ, खार, मुम्बई–२०१४।
6. माठरवृत्तिसहिता साङ्ख्यकारिका, व्याख्याकारः– पं. थानेशचन्द्र उप्रेती, चौखम्बा संस्कृत प्रतिष्ठानम्, वाराणसी, १६६०।
7. पञ्चदशी– श्रीमद्विद्यारण्यमुनिप्रणीता, चौखम्बा संस्कृत प्रतिष्ठानम्, दिल्ली, २००८।
8. शिवानन्दलहरि, आदिशङ्कराचार्यः, चौखम्बा कृष्णदास अकादमी, वाराणसी, २००४।



सहायकाचार्या, न्यायदर्शनम्,
श्रीसोमनाथसंस्कृतविश्वविद्यालयः,
वेरावलम्।